कृपया यह ग्रन्थ नीचे निर्देशित तिथि के पूर्व अथवा उक्त तिथि तक वापस कर दें। विलम्ब से लौटाने पर प्रतिदिन दस पैसे विलम्ब शुल्क देना होगा।

श्रीगणेशाय नमः ।

श्रीशाण्डिल्यशतसूत्रीयं

भक्तिमीमांसादर्शनम् ।

संस्कृतव्याख्यया भाषाव्याख्यया च सहितम् ।

गंगाविष्णु श्रीकृष्णदास,

लक्ष्मीवेङ्कटेश्वर छापाखाना,

कल्याण–मुंबई.

श्रीगणेशाय नमः ।

श्रीशाण्डिल्यशतसूत्रीयं
भक्तिमीमांसादर्शनम् ।

पं० मुरलीधरशर्मराजवैद्यविरचितया संस्कृत-
व्याख्यया भाषाव्याख्यया च सहितम् ।

तदिदम्

श्रीकृष्णदासात्मज-गङ्गाविष्णोः
अध्यक्ष " लक्ष्मीवेङ्कटेश्वर " मुद्रणालये
मैनेजर पं० शिवदुलारे वाजपेयीत्यनेन स्वाम्यर्थं
मुद्रयित्वा प्रकाशितम् ।

शकाब्दाः १८३८, संवत् १९७३.

कल्याण-मुंबई.

॥ श्रीः ॥

ॐ तत्सत्

श्रीशांडिल्यशतसूत्रीयं

भक्तिमीमांसादर्शनम् ।

प्रथमोऽध्यायः ॥ १ ॥

अथातो भक्तिजिज्ञासा ॥ १ ॥

मंगलाचरणम् ।

श्रीराधावल्लभं नत्वा मुरलीधरशर्मणा ।
शाण्डिल्यभक्तिसूत्राणां सम्यग्व्याख्या विरच्यते ॥ १ ॥

सं० टी०—अथेति पूर्वमीमांसाशास्त्रोक्तकर्मकाण्डाधिकारानंतरं अतः अस्मात् भक्तिजिज्ञासा कर्तव्येति शेषेणान्वयः । जिज्ञासा ज्ञातुमिच्छा विचारश्च । अपरे तु अथशब्दं अधिकारार्थे मन्यंते नानंतर्यार्थे श्रीप्रह्लादादेः कर्मकांडाकरणेऽपि भक्तिसद्भावात् । सा तु न धर्मवत् कृतिसाध्या न वा ब्रह्मवद्ज्ञेया किंतु नैरंतर्यप्रेमरूपा । सा भक्तिः समासेन

नवधा यथा–"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्
अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥ " इति नवधा
प्राप्या ॥ १ ॥

भाषा-अब पूर्वमीमांसाशास्त्रोक्तकर्मकांडके अधिकारके अनं
यहांसे भक्तिजिज्ञासा कर्तव्य है । जिज्ञासाका अर्थ जानने
इच्छा या विचार है, अर्थात् भक्तिमार्गके जाननेकी इच्छा क
चाहिये अथवा भक्तिका विचार करना चाहिये । कई आच
" अथ " शब्दको अधिकारार्थमें मानते हैं, अनंतर अर्थमें
नहीं मानते, क्योंकि ध्रुव प्रह्लादादि भक्तोंको कर्मकांडके अधिका
से पहलेही बालअवस्थाहीसे भक्तिका प्रादुर्भाव हुआ था । भ
धर्मकी तरह क्रियासाध्य नहीं है और न इसे ब्रह्मकी तरह ज्ञे
(ज्ञानसाध्यत्व) है किंतु यह निरंतर प्रेमरूपही है । यह भ
संक्षेपसे नवधा है, जैसे–श्रवण, कीर्तन, स्मरण, पादसे
अर्चन, वंदन, दास्य, सख्य और आत्मनिवेदन इन नौ द्वा
प्राप्य है ॥ १ ॥

सा पराऽनुरक्तिरीश्वरे ॥ २ ॥

सं० टी०--ईश्वरे अनुरक्तिः सा परा पराभक्तिरित्यर्थः
ईश्वरे परमोपास्ये अनुरक्तिः अनुरागः । रागस्य द्वेषप्रति
क्षभावात् सुखानुशयित्वात् सुखस्य चानुकूलवेद

त्वात् अनुकूलवेदनीये सौंदर्यशृंगारादिसंपन्ने स्वरूपे विशेषानुरागप्रादुर्भावदर्शनात् ईश्वरेऽपि वात्सल्यसौंदर्यशृंगारादिसंपन्ने परमकमनीये श्रीकृष्णस्वरूपे चात्यनुरक्तिसद्भावात् तत्रैव परा भक्तिर्भवितुमर्हति । वात्सल्यादिगुणसंपन्नेषु श्रीरामचंद्रादिष्वपि च रूपगुणादिरहिते ज्ञानमात्रेऽपि दुर्विज्ञेये प्रतिकूलानुकूलवेदनीयाभाववति रागद्वेषादिशून्ये कथनोपकथनमात्रे ईश्वरे अनुरक्तेरभावात् पराभक्तिर्भवितुं नार्हति ॥ २ ॥

भाषा–ईश्वरमें अनुरक्ति अनुराग अर्थात् पूर्ण प्रेमही परा भक्ति है । अब जानना चाहिये कि राग जो है सो द्वेषका प्रतिपक्षी है और सुखानुशयी है और वही जो अनुकूलवेदनीय हो अर्थात् अच्छा लगे सो ही सुख है और अनुकूलवेदनीय (अच्छा मालूम होनेवाले) शृंगार तथा सुंदरतादियुक्त स्वरूपमें विशेष अनुराग (प्रेमभाव) होना प्रत्यक्ष संसारमें दीखता है इससे ईश्वरमें भी वात्सल्य सुंदरता शृंगार आदिसे संपन्न परमरमणीक श्रीकृष्णभगवान्-स्वरूपमें अत्यंत अनुराग (प्रेमभाव) होनेसे कृष्णभगवान्हीमें पराभक्ति होसकती है । तथा वात्सल्यादिगुणयुक्त श्रीरामचंद्रादिकोंमें भी भक्ति हो सक्ती है । परंतु गुणरूपादिसे

रहित और ज्ञानमात्र करके भी कठिनाईसे जानने योग्य
और जो प्रतिकूल अनकूल वेदनीय न हो अर्थात्
न बुरा मालूम हो न अच्छा और जहां न द्वेष है न राग
है, कथनोपकथनमात्र ईश्वर है उसमें अनुराग नहीं होसकने
वहां परा भक्ति भी नहीं होसक्ती । सारांश यह कि विष्णु शि
राम कृष्णादि सगुणरूप ईश्वरमें अनुराग होनेसे भक्ति होसक्ती है
निर्गुण रूपरागादिरहितमें अनुराग ही नहीं, तब नवधा भ
क्या और कैसे होसक्ती है । और जितना जीवका भुक्ति औ
मुक्तिसंबंधी कल्याण भक्तिद्वारा होसक्ता है उतना न कर्मकांड
होसक्ता है न ब्रह्मज्ञानसे । क्योंकि कर्मकांड प्रवृत्तिमार्ग होने
विशेषकर भुक्तिका साधन है । मुक्तिका विशेषकर नहीं है
एकपक्षीय है तौभी उसमें विधि और क्रियाकी इतनी कठिनता
कि बातबातमें जरासी न्यूनाधिकता अस्तव्यस्तता आदिमें का
सिद्धिमें विक्षेप होकर उलटा विघ्नका भय होता है और ब्रह्मज्ञा
नका भुक्ति अर्थात् लौकिक सुख धन संतान आदि स्वर्गपर्यंत
कुछ संबंध ही नहीं वह केवल मुक्तिहीका साधन होसक्ता है
यह भी एकपक्षीय है तौभी उस ब्रह्मको अगोचर अनाम अरू
कहते हैं इससे सहज ही ध्येय और ज्ञेय नहीं होसक्ता । बडे वि
रकी बात है कि प्रायः लोग निराकार ब्रह्म ब्रह्म पुकारते हैं वे
विचार नहीं करते कि निराकार ब्रह्म क्या करता है, वह ब्रह्म
निराकार सर्वव्यापकतासे प्राकृतिक उपकार करता है सो करता
रहता है विशेष कुछभी नहीं करता, जैसे सर्वव्यापक अग्नि अ

मादि काष्ठमें होकर कुछ उसका प्राकृतिक उपकार (पृथ्वीगत जलके अंश शोषण करना आदि) ही करता है र विशेष कार्य किसीका भी दाल भात पकाना आदि नहीं कर सक्ता, अस्तु । यदि किसीको अपना दाल भात पकाना आदि कार्य साधन करना है तो उस सर्वव्यापीको एक देशमें विशेषव्यापी करना होगा अर्थात् अपने कार्यसाधनके लिये अरणी काष्ठ मथकर प्रत्यक्ष साकार अग्नि संपादन करना होगा और ऐसा भी मिथ्या भ्रम नहीं करना होगा कि यहां इतना अधिक अग्नि हो गया है तो और जगहसे कम या नष्ट होगया होगा जैसा कि कुतर्की लोग तर्क करते हैं कि राम या कृष्ण ईश्वर हैं तौ क्या और कहीं भी ईश्वर नहीं रहा उनको ऊपरका दृष्टांत गौर करना चाहिये कि जब अरणी काष्ठमें अग्नि विशेष प्रकट हुआ है तौ भी सब अरणी काष्ठोंमेंसे नष्ट या कम नहीं होगया है किंतु वहांपर उसके अंशांशोंका विशेषभाव प्रत्यक्ष और प्रकट हो गया है जिससे विशेष उपकार होसके । इसी प्रकार भक्तोंके उपकारके लिये ईश्वरके साकार अवतार होते हैं । जो समूह अवतार नहीं मानते हैं वे भी किसी न किसी प्रकार किसी साकारको मध्यस्थ या शिक्षक या नियत मानकर ही ईश्वर आराधन करते हैं, विना साकारकी प्राधान्यता या नियतिके कोई भी ईश्वराराधन नहीं करसक्ता इसमें संदेह नहीं । उपरोक्त वर्णनसे सिद्ध हुआ कि जीवोंके सभी उपकार (कामना) सगुण साकार ईश्वरके अनुराग

(भक्ति) करनेसे सहजहीमें सिद्ध होता है । अहाहा यह भक्ति मार्ग उत्तम और सरल भी कैसा है कि न जिसमें समयका बंध है, न क्रियाकी आवश्यकता है न जातिकी उत्तमताकी जरूरत है न विद्याकी न तपकी न योगकी किसीभी बातकी जरूरत नहीं है, केवल ईश्वरमें उसके वात्सल्यादि गुणोंमें लीलाओंमें पूर्ण अनुराग पूरे प्रेमीकी जरूरत है चाहे किसीभी अवस्थामें हो ईश्वरमें पूर्णप्रेम करना अर्थात् मैं कैसा भी हूं तेरा हूं यही निरंतर भावना रखना तदीयता (पराभक्ति) है इसीसे लौकिक सब कामना सिद्ध होकर मोक्षपद प्राप्त होता है सो अगाडी वर्णन करते हैं ॥ २ ॥

तत्संस्थस्यामृतत्वोपदेशात् ॥ ३ ॥

सं०टी०—तत्संस्थस्य भक्तस्य अमृतत्वं भवतीत्युपदिशंत्याप्ताः । तस्यां भक्तौ संस्था यस्य स तत्संस्थः भक्तस्तस्य अथवा तस्मिन् ईश्वरे संस्था भक्तिः यस्य तस्य अमृतत्वं मोक्षः ब्रह्मपदं वा संस्था अवस्थितिः तस्मात् भक्तिजिज्ञासा कार्या ॥ ३ ॥

भाषा—तत्संस्थको अर्थात् भक्तको मोक्ष (ब्रह्मपद) प्राप्त होता है ऐसा महात्माओंका अथवा शास्त्रका उपदेश है इसीसे अनुरागरूपा भक्तिकी प्रधानता है और उसीकी जिज्ञासा कर्तव्य है ॥ ३ ॥

ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः ॥ ४ ॥

सं०टी०—ईश्वरज्ञानमेव भक्तिरिति चेन्न द्विषतः अपि ज्ञानं भवितुमर्हति परंतु तस्य संस्थितिः प्रेमरूपा भक्तिर्भवितुं नार्हति । संस्था अनुरक्तिरूपा भक्तिरेव न तु ज्ञानं यथा भूपालानुरक्तास्तस्यामात्यकलत्रमित्रादयो भवंति प्रतिपक्षिणो नृपास्तज्ज्ञानवतोऽपि नानुरक्ताः ॥ ४ ॥

भाषा—ईश्वरका ज्ञान (ब्रह्मज्ञान) मात्र ही भक्ति है ऐसा नहीं होसक्ता क्योंकि शत्रुका भी ज्ञान तो होता ही है परंतु उसमें अनुराग (प्रेम) रूपा भक्ति कदापि नहीं होसक्ती । जैसे कि राजाके मंत्री मित्र तथा कलत्रादिकी उसमें प्रेमपूर्वक भक्ति होसक्ती है परंच प्रतिपक्षी राजालोगोंका पूरा परिज्ञान होनेपर भी अनुराग (प्रेम) रूपा भक्ति उसमें कदाचित् भी नहीं होसक्ती इसमें संदेह नहीं । विचार कर देखिये तौ जाननेवाले और प्रेमीमें कितना बडा अंतर है । जानकारीमात्रसे कुछ नहीं होसक्ता, जितना कि प्रेमसे उपकार होसक्ता है, इसीसे ब्रह्मज्ञान भक्तिकी बरावरी नहीं करसक्ता । अनजानकी अपेक्षा जानकारका कुछ परिचय होसक्ता है परंतु प्रेमीके समान जानकार मात्रसे प्रेम और अपनास कदापि संभव नहीं ॥ ४ ॥

तयोपक्षयाच्च ॥ ५ ॥

सं० टी०—तया भक्त्या ज्ञानस्य उपक्षयात् । ज्ञानस्य इति पूर्वसूत्रादनुवृत्तिः । उपक्षयः क्षीणता भक्तौ सत्यां ज्ञानस्योपक्षयोऽपि कदाचिद् भवतीति प्रतीयते यथा गीत-गोविंदे " नायातः सखि निर्दयो यदि शठः " इत्यादि भग-वति श्रीकृष्णे राधावचनं श्रीराधायाः श्रीकृष्णचंद्रमीश्वरं जानत्या ज्ञायातिप्रेमरूपया परया अतिभक्त्या निर्दयः शठः इत्युक्तिः ज्ञानोपक्षयादेवास्ति न तु द्वेषात् ॥ ५ ॥

भाषा—इस अनुरागरूपा परा भक्तिसे ज्ञानका उपक्षय जा सकता है जैसे गीतगोविंदमें श्रीराधाजीका वचन है कि सखि ! निर्दय शठ श्रीकृष्ण नहीं आये इत्यादि श्रीराधा कृष्णमहाराजको ईश्वर जानती भी थी पर प्रेमरूप परा भक्तिसे निर्दय शठ ऐसे कठोर शब्द कहना यही ज्ञानका उपक्षय है अर्थात् राधाजीने प्रेमभक्तिमें ज्ञानके उपक्षय होजानेसे कहा है (द्वेषभावसे नहीं कहा) और जब पराभक्तिमें ज्ञानका उपक्षय होजाता है तब भक्तिकी प्रधानता है ॥ ५ ॥

द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः ॥ ६ ॥

सं० टी०—भक्तेः स्वरूपं दर्शयन्नाह द्वेषेति ॥ द्वेष-

पक्षभावात् रसशब्दात् रसकथनात् च राग एव भक्तिः । षप्रतिपक्षभावः द्वेषविरोधी रागः । द्वेषविरोधित्वात् राग एव क्तिर्भवितुमर्हति । तथा च रसो रागः भक्तौ रसशब्द एव कथनात् च भक्तिः राग एव । वस्तुतस्तु भक्तिरीश्वरविष-वानुरक्तिरिति युज्यते । तथा च तैत्ति० रसं ह्येवायं ल-ब्ध्वाऽनंदी भवतीति शब्दात् तत्रापि ब्रह्मानंदाविर्भावसुक्तेर्ब्र-गोचरस्य रसस्य हेतुतावगम्यते । द्वेषविरोधित्वं भक्तेर-धानं तथाच गीतायां श्लो० "ममात्मपरदेहेषु प्रद्विषंतोऽ-यसूयकाः । तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु । आसुरीं योनिमापन्ना ढा जन्मनि जन्मनि । मामप्राप्यैव कौंतेय ततो यांत्यधमां तिम् ॥" इति ॥ ६ ॥

भाषा—द्वेषके प्रतिपक्ष होनेसे और रस कहेजानेसे राग (अनु-ाग) ही भक्ति है । संसारमें द्वेष और प्रेम दो ही वस्तु हैं सो षका प्रतिपक्ष प्रेम है और प्रेमसे भक्ति होती है अर्थात् द्वेषका तिपक्षी जो राग है सो ही भक्ति है इससे तथा राग रसरूप थन कियाजाताहै इससे भक्ति सरस है क्योंकि भक्तिमें अनुराग-रूप रसका प्रादुर्भाव होता है और उस अनुरागरूप रससे आनंद

(ब्रह्मानंद) की प्राप्ति होती है ऐसा ही तैत्तिरीय उपनिषद् भी लिखा है और गीतामें कृष्णजीने कहा है कि जो मुझमें औ आत्मपर देहीमें द्वेष रखनेवाले क्रूर मनुष्य हैं उन नीच प्राणि को मैं राक्षसी योनियोंमें निविष्ट करता हूं और वे अनेक जन्म तक मुझे प्राप्त न होकर अधम गतिको जाते हैं और ज्ञान द्वेष दोनोंसे शून्य हैं इसीसे सरस भी नहीं है इस कारणसे भा हीकी उत्तमता है ॥ ६ ॥

न क्रियाकृत्यनपेक्षणाज्ज्ञानवत् ॥ ७ ॥

सं०टी०—न क्रियायाः कृतेः अनपेक्षणात् ज्ञानवत् सा भक्तिर्न क्रियात्मिकास्ति यथा ज्ञानं क्रिया इन्द्रिय व्यापारात्मिकायां फलेच्छाव्यापाररूपायां कर्तव्यताय मिति (शब्दस्तोमः) । कृतिः पुरुषप्रयत्ने कर्तृव्यापारे का चेति (श० स्तो०) । प्रेमरूपायां भक्तौ क्रियायाः कृते नैवापेक्षा भवतीति फलितोऽर्थः । तथाह स्वमेश्वरः । भक्तिर्न क्रियात्मिका भवितुमर्हति प्रयत्नानुविधानाभावा यन्न प्रयत्नानुविधायि तन्न क्रियात्मकं यथा ज्ञानम् ॥

भाषा—प्रेमरूपा पराभक्तिमें कुछ भी क्रिया कृति पूजादि वि बनादिकी आवश्यकता नहीं है जैसे ज्ञानमें और न इस बा जप तप पूजादिविडंबनासे भक्ति होती है और न विना प्रेमभ

निषन्न बाहरी आडंबरी क्रियाओंसे कुछ ऐहिक और पारलौकिक मं और्ण सिद्धि ही होती है। भक्ति तो केवल निरंतर मानसिक अनुराग ाणिही है अर्थात् प्रेमभक्ति किसी क्रियाके आधीन नहीं है वह तो जन्मपूर्वोपार्जित गौणभक्ति द्वारा ईश्वर अथवा महापुरुष गुरुकी कृपासे न स्वयं ही मनमें होजाती है । ज्ञानकी भांति औद्योगिक क्रियासे भा नहीं, जैसे किसीभी पदार्थका ज्ञान उसमें औद्योगिक क्रिया करने सीखने) से प्राप्त होसक्ता है परंतु प्रेम किसी भी औद्योगिक क्रिया विद्या आदिसे प्राप्त नहीं होसक्ता किंतु प्रेमपात्रके गुण सौंदर्यादि मनमें खचित होनेसे स्वयं ही उत्पन्न होता है ॥ ७ ॥

अत एव फलानन्त्यम् ॥ ८ ॥

सं०टी०—अत एव एतस्मात्कारणादेव फलस्यानंतत्वम् । यतः सा भक्तिर्न क्रियात्मिका तस्मादेव भक्तेः फलस्य निःश्रेयसस्य अनंतत्वमुपपद्यते ॥ ८ ॥

भाषा—इसी कारणसे भक्तिका फल अनंत है । जब कि भक्ति क्रियात्मिका नहीं है इससे उसके फल निःश्रेयस कल्याणरूपी फलकाभी अंत नहीं है क्योंकि जो क्रियात्मक (क्रियासाध्य) पदार्थ हैं वे सभी क्षीयमाण हैं और जो क्रियात्मक नहीं हैं वे कभी क्षीयमाणभी नहीं हैं इसीसे वे अनंत हैं अर्थात् कभी उनका अंत नहीं होता है ॥ ८ ॥

तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत् ॥९॥

सं०टी०—तद्वतः ज्ञानवतः प्रपत्तिशब्दात् न ज्ञानं, मु-
च्च इतरप्रपत्तिवत् । प्रपत्तिशब्दात् प्रपत्तिकथनात् प्रप-
प्रपन्नता शरणागतिः इतरप्रपत्तिः देवतांतरप्रपत्तिः ज्ञान-
प्रपत्तिकथनादपि न ज्ञानं (मुख्यं) किंतु ज्ञानं च इतरप्र-
पत्तिवदिति अथवा इतरप्रपत्तिवत् ज्ञानं विनापि ईश्व-
प्रपत्तिः स्यात् ॥ ९ ॥

भाषा—ज्ञानीको भी ईश्वरकी प्रपत्ति (शरणागतिप्राप्ति
होजाती है ऐसा शास्त्रोंमें कहा है तौ भी ज्ञान भक्तिके सम
नहीं है क्योंकि ज्ञानके विना भी प्रेमरूपी ईश्वरभक्तिसे ईश्वर
प्राप्ति होसक्ती है जैसे कि बहुतसे भक्त ब्रह्मज्ञानी विद्वान् न होने
भी ईश्वरके चरणारविंदोंमें पहुँच गये हैं । परंतु विना ईश्वरकी भ-
हुए कोईभी ज्ञानी उस पदको प्राप्त नहीं हुआ । जितने ज्ञानी
सभीके चित्तमें भक्ति उत्पन्न हुई है तभी उस पदको प्राप्त हुए
वस्तुतः जितनी शीघ्र जितनी सहल भक्तिसे प्रपत्ति होती है उत-
शीघ्र उतनी सहल ज्ञानसे नहीं हो सक्ती । जैसे भगवान्ने गीता
उपदेश किया है कि " बहूनां जन्मनामंते ज्ञानवान् मां प्रपद्यते
अर्थात् बहुत जन्मोंके अंतमें ज्ञानवान् मुझे प्राप्त होते हैं
भक्तिके समान ज्ञान ईश्वरप्राप्तिका कारण नहीं होसक्ता

ऐसा भी अर्थ करते हैं कि ज्ञानसे इतर प्रपत्ति हो जाती है अर्थात् ज्ञानकी विदग्धतासे बुद्धि स्थिर नहीं रहती अनेक प्रकार देवताओं और अनेक मतोंकी तरफ बुद्धि चलायमान होतीरहतीहै जैसा कि गीता अ०७ श्लोक २० में लिखा है कि "कामैस्तैस्तैर्हृतज्ञाना प्रपद्यंतेऽन्यदेवताः । " अर्थात् उन्हीं उन कामों करके ज्ञानीका ज्ञान डावाँडोल होकर वे अन्यदेवताओंको प्राप्त होते हैं। प्रयोजन यह है कि जबतक पूर्णप्रेमरूपा भक्ति नहीं होती है तबतक प्रपत्ति ईश्वरप्राप्ति हो ही नहीं सक्ती ॥ ९ ॥

इति प्रथमाध्यायस्य प्रथमाह्निकम् ।

सा मुख्येतरापेक्षितत्वात् ॥ १० ॥

सं०टी०—सा भक्तिः मुख्या इतरापेक्षितत्वात् । इतरेषु ब्रह्मज्ञानयोगादिष्वपि भक्तेरपेक्षा भवति किंतु पराभक्तौ न च ज्ञानयोगादीनामपेक्षा अत एव भक्तिरहितज्ञानमात्रेण प्रपत्तिसिद्धिमोक्षादीनामदर्शनात् ब्रह्मज्ञानरहितेन परभक्तिमात्रेण प्रपत्त्यादिदर्शनाच्च भक्तेर्मुख्यत्वमुपपद्यते॥१०॥

भाषा—पराभक्ति मुख्य है क्योंकि इतर ब्रह्मज्ञान तप योगादिमें भी भक्तिकी आवश्यकता होती है और परप्रेमरूपभक्तिमें ज्ञान योग तप आदि किसीकी भी आवश्यकता नहीं। वस्तुतः भक्तिरहित

तप अथवा ज्ञानमात्रसे प्रपत्ति सिद्धि मोक्षादिक कुछभी नहीं हो और ब्रह्मज्ञान तप आदिके विना भी पराभक्ति हो जानेसे प्र सिद्धि मोक्षादिक सब कुछ प्राप्त होजाता है ऐसा बहुधा भ देखा जाता है इसीसे भक्ति ही मुख्य है, ज्ञान नहीं ॥ १० ॥

प्रकरणाच्च ॥ ११ ॥

सं०टी०—प्रकरणादपि भक्तिर्मुख्या । प्रकरणं तपोज्ञानादयः प्रकरणानि भक्तेरंगानीत्यर्थः । भक्तावं त्वमगवम्यते अंगांगिनोर्मध्ये चांगी स्वतंत्रः अंगानि गिपरतंत्राणि तस्माच्च भक्तिरेव मुख्या ॥ ११ ॥

भाषा—प्रकरणसे भी भक्ति ही मुख्य प्रतीत होती है। प्रक णका अर्थ अंग है और तप ज्ञानादिक प्रकरण हैं अर्थात् भक्ति अंग हैं। भक्ती अंगा है और अंग अंगीके आधीन रहते हैं अंगी अंगोंके आधीन नहीं होता है इससे भी तप योगादिसे भक्ति ही मुख्य रही ॥ ११ ॥

दर्शनफलमिति चेन्न तेन व्यवधानात् ॥ १२ ॥

सं०टी०—दर्शनं ज्ञानमेव फलं अथवा दर्शनस्य ज्ञा स्यैव फलं अमृतत्वं भवतीति चेन्न तेन ज्ञानमात्रेण व्य धानात् । ज्ञानेन तु भक्तिरहितेन व्यवधानं भवितुमर्हति

नं बुद्धिः । ज्ञानं अध्यात्मज्ञानोपायः, व्यवधानं पार्थक्यं वरणं इति (श० स्तो०) ॥ १२ ॥

भाषा—दर्शन ज्ञान ही फलरूप है अथवा दर्शनसे ज्ञानसे ही रूप अमृतत्व प्राप्त हो जाता है ऐसा नहीं है क्योंकि केवल नमात्रसे तौ व्यवधान हो जाता है अर्थात् ज्ञानमात्र तौ हो और भक्ति न हो तौ उससे कुछ कार्यसिद्धि अमृतत्वादिकी प्राप्ति हीं हो सक्ती किंतु उससे उलटा व्यवधान होजाना संभव है । यही छांदोंमें लिखा भी है कि जो ज्ञानी भक्तिमान् होता है वही राट् अर्थात् मुक्त होता है इससे वेदमेंभी भक्तिहीकी प्रधानता ती है ॥ १२ ॥

दृष्टत्वाच्च ॥ १३ ॥

सं० टी०—दृष्टत्वाच्चापि भक्तिर्मुख्या । लोकेऽपि प्रत्यक्ष- था भक्तिर्मुख्या दृश्यते इति फलितोऽर्थः । ज्ञानादिषु मुख्य- नैवोपपद्यते पूर्णज्ञानेन विनापि शैशवावस्थायामेव ध्रुवस्य मेश्वरप्राप्तिस्तत्र तु परप्रेमरूपां भक्तिरेव कारणं नतु नादयः । तथा चोक्तं " व्याधस्याचरणं ध्रुवस्य च वयो या गजेंद्रस्य का का जातिर्विदुरस्य यादवपतेरुग्रस्य किं षम् ॥ कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनं

"भक्त्या तुष्यति केवलैर्न च गुणैर्भक्तिप्रियो माधवः" ॥१

भाषा—प्रत्यक्ष देखेजाते भी भक्ति ही मुख्य प्रतीत होती संसारमें ऐसे बहुतसे प्रत्यक्ष उदाहरण दीख रहे हैं जिनमें भ हीकी मुख्यता पाई जाती है । ज्ञानादिककी मुख्यता इतनी पाई जाती । जैसे कि पूर्णज्ञानके विना ही बालकअवस्थामें जीको परमेश्वरकी प्राप्ति हुई उसमें केवल दृढ प्रेमरूपा भक्ति कारण थी । इसी भांति अनेक भक्तोंको पूर्णज्ञानादिके विना केवल दृढप्रेमरूपा भक्तिसे ईश्वरकी प्राप्ति हुई. देखो व्याधक ज्ञानी था, वाल्मीकिजी पहले कौनसे विज्ञानी थे, गजराज कै ज्ञानी था, भीलनी तौ ज्ञानसे शून्यही थी, प्रेमसे झूठे बेर भ रामचन्द्रजीको खिलाकर परमपदको प्राप्त हुई ये तौ प दृष्टांत हैं, इसके पीछे थोडे दिनके प्रसिद्ध भक्तोंको देखिये करमाबाई सदन धानाजाट नामदेव आदि अनेक भक्त हुए, कौनसे विद्यावान् अथवा ज्ञानी थे, इनमें विद्याज्ञानादि कुछभी उच्च नीच किसी भी जातिमें उत्पन्न हुआ हो पर जिसने दृढ ईश्वरकी भक्ति करी उसीको ईश्वरकी प्राप्ति हुई है तथा अद्यु मान समयमें भी तलाश करनेसे ऐसे भक्त मिलते हैं जो विद्या या ज्ञान या उच्चता शौचाचारादि रखते हों या रखते पर ईश्वरकी परभक्तिमें लवलीन हैं उन्हें ईश्वरप्राप्ति हो इसमें संदेह नहीं ॥ १३ ॥

अत एव तदभावाद्वल्लवीनाम् ॥ १४ ॥

सं०टी०—अत एव तदभावात् ब्रह्मविषयकविज्ञानाभा-त् वल्लवीनां निष्कृतिर्भवतीति स्मर्यते । वल्लवी व्रज-पिका एवमेव बहूनां भक्तानां ब्रह्मविषयकज्ञानाभावेऽपि ानुरागरूपभक्त्या एवेश्वरप्राप्तिः ॥ १४ ॥

भाषा-इसीसे ब्रह्मविषयक ज्ञानके विना भी अनुरागरूप भक्ति-त्रसे व्रजगोपिकाओंका निस्तारा होगया । इसी प्रकारसे बहुतसे क्तोंको ब्रह्मविषयक ज्ञानके विना केवल अनुरागरूपा दृढ भक्ति-से ईश्वरकी प्राप्ति हुई है इसीसे भक्ति परम प्रधान है और भक्ति-से ईश्वरकी प्राप्ति होती है अन्यथा नहीं ॥ १४ ॥

क्त्या जानातीति चेन्नाभिज्ञप्त्या साहाय्यात्॥ १५॥

सं०टी०—भक्त्या जानाति ज्ञानी भवति इति चेन्न भिज्ञप्त्या साहाय्यात् अभिज्ञप्तेस्तु भक्तिसाहाय्यम् । तु भक्तेः फलत्वम् । अभिज्ञप्तिः ज्ञानम् ॥ १५ ॥

भाषा-जो ऐसा कहें कि भक्ति करनेसे ज्ञान (ब्रह्मज्ञान या वरादिका ज्ञान) होता है फिर ईश्वरप्राप्ति अथवा मुक्ति होती है ऐसा नहीं है क्योंकि अभिज्ञप्ति अर्थात् ज्ञान तो भक्तिका ायक है जब पूर्णभक्ति ही होगई फिर ज्ञानादिककी कुछ भी पेक्षा नहीं । हां पहले कुछ ज्ञान होकर पीछे उसमें भक्ति होती है

इससे ज्ञानको भक्तिकी आवश्यकता है भक्ति प्राप्त हुए पीछे ज्ञा
अपेक्षा नहीं ॥ १५ ॥

प्राग्युक्तं च ॥ १६ ॥

सं०टी०—एवमेव प्राग्युक्तम् । पूर्वसूत्रेष्वेवमुक्तं
वदादावपि चैवमुक्तम् ॥ १६ ॥

भाषा—पहलेसे भी ऐसा ही कहा जाचुकाहै अर्थात्
पूर्वोक्त सूत्रोंमें ऐसा कहदियाभी है अथवा अन्य शास्त्रों
दादिमें भी ऐसा हीं कहा है कि भक्तिके बाद ज्ञानकी आ
कता नहीं है ॥ १६ ॥

एतेन विकल्पोऽपि प्रत्युक्तः ॥ १७ ॥

सं०टी०—एतेन (उपरोक्तकथनोपकथनेन) ज्ञा
क्त्योरंगागित्वविकल्पोऽपि प्रत्युक्तः निराकृतः । ज्ञा
भक्तेरंगत्वमेव निश्चितम् ॥ १७ ॥

भाषा—इस उपरोक्त कथनोपकथनसे ज्ञान और भक्तिके
यमें अंग और अंगित्वका जो विकल्प था अर्थात् भक्तिक
ज्ञान है अथवा ज्ञानका अंग भक्ति है यह जो संदेह था
निवृत्त होगया और स्पष्ट यही निश्चय होगया कि भक्ति
प्रधान है, ज्ञान भक्तिका एक अंगरूप सामान्य है इससे
ही मुख्य है ॥ १७ ॥

देवभक्तिरितरस्मिन् साहचर्यात् ॥ १८ ॥

सं०टी०—देवभक्तिः इतरस्मिन् ज्ञातव्या (कुतः)
चर्यात् देवभक्तिः इंद्रादिदेवानां भक्तिः इतरस्मिन् ईश्वरे-
स्मिन् मंतव्येति शेषेणान्वयः । साहचर्यात् गुरुभक्त्या-
ाहचर्यात् अत एव ईश्वरानुरक्तिरेव परा भक्तिर्भवति
यस्मिन्देवादावनुरक्तिः पराभक्तिरिति फलितोऽर्थः॥ १८॥

भाषा—अन्य इंद्रादि देवताओंकी भक्ति ईश्वरेतर देवोंकी भक्ति
ानी चाहिये क्योंकि उसमें सहचारिताका दोष होनेसे वह
भक्ति नहीं होसक्ती । जैसी किसी एक देवकी भक्ति वैसी ही
देवताकी भक्ति तथा गुरुकी भक्ति जैसा एक देव वैसा ही
ा भी देवता होसक्ताहै । परा भक्ति अनन्यरूपा उसीमें हो
ाहै जिसके समान दूसरा कोई होही नहीं इसीसे परमेश्वरके
न दूसरा नहीं होनेसे परमेश्वरकी भक्ति ही पराभक्ति हो
ी है ॥ १८ ॥

योगस्तूभयार्थमपेक्षणात् प्रयाजवत् ॥ १९ ॥

सं०टी०—योगस्तु उभयार्थं ज्ञानार्थं भक्त्यर्थं च
यापेक्षणात् प्रयाजवत् । योगे तु ज्ञानस्यापेक्षा भक्ते-
ा च भवति तस्मात् योगस्तु प्रयाजतुल्यः । यथा प्रया-

जस्तथैव योग इति भावः । प्रयाजः क्रियाकृतिसापेक्षः तथैव योगोऽपि क्रियाकृतिसापेक्ष्य एव प्रयाजो वाजपेयाद्यंगं योगे च यमनियमासनप्रत्याहाराद्याडंबरीयक्रियाकाठिन्यं भवति न तु प्रेमरूपायां भक्तौ किंचिदपि क्रियाकाठिन्यम् अतो भक्तिरेव मुख्या ॥ १९ ॥

भाषा—योगमें तौ दोनोंकी अपेक्षा है अर्थात् ज्ञान और भक्ति दोनोंके लिये योग है और दोनोंकी योगमें आवश्यकता है इसलिये योग तो प्रयाज अर्थात् अश्वमेधादि यज्ञांगके ही समान है तथा जैसे प्रयाज क्रियाकृतिसाध्य एक साधन है वैसे ही योग भी क्रियाकृतिसाध्य साधन है । भक्तिके समान क्रियाकृतिरहित प्रेमरूप परमानंदप्राप्तिकारक नहीं है । योगमें यम नियम आसन प्राणायाम प्रत्याहार धारणा ध्यान समाधि ये कितने झंझट और आडंबर हैं, क्रियाओंकी कितनी कठिनता है । भक्तिमें न कुछ झंझट हैं न आडंबर न क्रियाओंकी कठिनता है न कुछ देश काल विधि क्रिया आदि बंधनोंकी आवश्यकता है । भक्तिमें तो ईश्वरविषयक एकमात्र प्रेमकी आवश्यकता है इससे भक्तिके समान योगादि कुछभी नहीं है भक्तिही मुख्य है ॥ १९ ॥

गौण्या तु समाधिसिद्धिः ॥ २० ॥

सं०टी०—' ननु योगे समाधिसिद्धिर्भवति यथा पातंजल

योगदर्शने प्रच्छर्दनविधारणाभ्यां वा प्राणस्य वीतरागस्मरणाद्वा ईश्वरप्रणिधानाद्वा इत्यादि ' सूत्रेषूक्ता सा कथमेव भक्ताविति तत्राह गौण्येति । भक्त्या गौण्या तु समाधिसिद्धिर्भवति सा च पतंजलिमतेनैव ईश्वरप्रणिधानाभिधेयाद्भगवद्भजनात् ईश्वरवाचकस्य प्रणवस्य जपाच्च समाधिसिद्धिरुक्ता तत्र तु ईश्वरप्रणिधानं तद्वाचकस्य प्रणवस्य जपादिक तत्सर्वमेव गौणभक्तिविषयम् । पराभक्तौ तु एतस्मादपि श्रेष्ठस्य परमेश्वरीयप्रेमपदस्य प्राप्तिः अत एवापि पराभक्तिर्मुख्या ॥ २० ॥

भाषा–" योगमें तौ समाधि होजातीहै जैसे पातंजलयोगदर्शनमें प्राणोंके बाहर भीतर करने अर्थात् भस्त्रिका नामक प्राणायामके अभ्यास बढ जानेसे समाधिसिद्धि होना तथा वीतरागके स्मरण करनेसे भी समाधिसिद्धि और ईश्वरप्रणिधान अर्थात् ईश्वरमें मन लगाकर भजन करनेसे भी समाधिसिद्धि होती है ऐसे कई सूत्रोंमें लिखाहै ऐसा भक्तिमें कैसे होसक्ताहै इसके समाधानके लिये ही यहां गौण्या तु समाधिसिद्धिः यह सूत्र कहा है । भक्तिमें तौ गौणी भक्तिसे ही समाधिसिद्धि होजाती है । देखिये पतंजलिजीने भी तौ ईश्वरप्रणिधानरूपक भगवत्के भजनसे तथा ईश्वरवा-

चक प्रणव (ॐकार) के जपसे समाधिसिद्धि होजाना वर्णन कियाहै, इसमें ईश्वरप्रणिधान और तद्वाचक ओंकारका जप इत्यादि सब यह गौणभक्तिहीका विषय है और गौणभक्तिरूप है और जब समाधिसिद्धि गौणभक्तिहीसे होजातीहै तौ पराभक्तिका यह तौ इससे भी श्रेष्ठ परमेश्वरीय प्रेमरूप परमपद है इससे भी भक्तिही मुख्य ठहरी ॥ २० ॥

हेया रागत्वादिति चेन्नोत्तमास्पदत्वात्संगवत् ॥२१॥

सं० टी०—भक्तिः रागरूपा रागश्च क्लेशः तथा चोक्तम्। पातंजले "अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्च क्लेशाः" अतो रागत्वात् भक्तिर्हेया चेत् तन्न उत्तमास्पदत्वात् ईश्वरविषयकप्रेमास्पदत्वात् सतां संगवत् यथा सतां संगो रागत्वेऽपि न कदाचित् क्लेशाय भवति किंत्वखंडानन्दहेतुरेव तथैव भक्त्यामीश्वरविषयकरागत्वेऽपि विप्रयोगक्लेशादीनामत्यंताभावता परमाक्षयानंदहेतुता च ॥ २१ ॥

भाषा—भक्ति रागरूप (प्रेमरूप) है और राग क्लेशरूप है जैसे पातजलमें लिखाहै कि १ अविद्या (अज्ञान) २ अस्मिता (अहंकार) ३ राग (प्रेम) ४ द्वेष (वैर) ५ अभिनिवेश (विषयोंमें प्रवृत्ति) ये पांच क्लेश हैं इससे रागरूप भक्ति भी त्यागने योग्य होनी चाहिये, परंतु ऐसा नहीं ।

उत्तमास्पद होनेसे अर्थात् ईश्वरविषयक प्रेमका स्थान होनेसे भक्ति त्यागने योग्य कदापि नहीं है जैसे सत्संग साधुमहात्माओं-का संग प्रेममय होकर भी कभी क्लेशदायक नहीं होता है किंतु अखंड आनंददायक ही होता है इसी प्रकार भक्तिमें ईश्वर-विषयक प्रेम होकर भी वियोग और क्लेशादिकका होना त्रिकाल-में नहीं हो सक्ता और परम अक्षय आनंदकी प्राप्ति होती है इससे भक्ति श्रेष्ठ कर्त्तव्य कार्य है ॥ २१ ॥

तदेव कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् ॥ २२ ॥

सं० टी०—कर्मिज्ञानियोगिभ्य आधिक्यशब्दात् आ-धिक्यकथनात् तत् एव भजनं भक्तिकार्यं मुख्यम् । तच्छब्देन अन्वयशक्तित्वात् भक्तिविशेषणत्वमपि युक्तम् । भक्तिमुख्यत्वं गीतायां तथा चोक्तं अ० ६ श्लो० ४६।४७ "तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः । कर्मि-भ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ १ ॥ योगिना-मपि सर्वेषां मद्गतेनांतरात्मना । श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ २ ॥ इति " ॥ २२ ॥

भाषा—कर्मी (कर्मकांडी) ज्ञानी (ब्रह्मज्ञानी) और योगी (यो-गाभ्यासी) इन सबसे भक्तिकी अधिकता कही है इससे भक्ति ही

मुख्य है । देखो श्रीगीताजीके छठे अध्यायके ४६।४७ श्लोकमें श्रीभगवान्‌ने कहा है कि तपस्वीसे योगाभ्यास करनेवाला योगी अधिक है और ज्ञानी (ब्रह्मज्ञानी) से भी योगी श्रेष्ठ है और कर्मकांडी यज्ञादि कर्म करनेवालेसे भी योगी ही श्रेष्ठ होता है इससे हे अर्जुन ! तू योगी हो । परंतु समस्त योगियोंमें भी मुझमें मन लगाकर श्रद्धापूर्वक जो मेरा भजन करता है वह भक्त मुझे सबसे श्रेष्ठ है इस कारण भक्ति ही सबसे श्रेष्ठ है इसमें संदेह नहीं ॥ २२ ॥

प्रश्ननिरूपणाभ्यामाधिक्यसिद्धेः ॥ २३ ॥

सं० टी०—शास्त्रे प्रश्ननिरूपणाभ्यां भक्तेरेवाधिक्यसिद्धिः । यथा गीतायां अ० १२ अर्जुनस्य प्रश्नः "एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥" इति । अस्योत्तरे भगवता कृष्णेन निरूपितं "मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते । श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ॥" इति । अतोऽपि भक्तिर्मुख्या ॥ २३ ॥

भाषा—प्रश्न और निरूपणसे भी भक्तिकी ही अधिकता पाई जातीहै । शास्त्रमें अनेक जगह ऐसे प्रश्नोत्तर हैं जैसे गीताके १२ अध्यायमें भी अर्जुनने प्रश्न कियाहै कि जो भक्तिसे आपकी

उपासना करते हैं और जो अव्ययब्रह्मकी (ज्ञानरूप) उपासना करते हैं इनमें कौन श्रेष्ठ है इसके उत्तरमें कृष्ण भगवान्ने कहाहै कि जो श्रद्धासे मुझमें मन लगाकर नित्य युक्त मेरी उपासना (भक्ति) करतेहैं वेही मुझे श्रेष्ठ हैं बस इसमें भी ब्रह्मज्ञानकी अपेक्षा भक्तिही परम श्रेष्ठ ठहरी ॥ २३ ॥

नैव श्रद्धा तु साधारण्यात् ॥ २४ ॥

सं०टी०—भक्तिस्तु श्रद्धा नैव कुतः साधारण्यात् । श्रद्धा गुरुदेवादिषु विश्वासः इति शब्दस्तोमः । सा श्रद्धा तु साधारणरूपा अनेकेषु समानरूपा दृश्यते परंतु परा भक्तिस्तु अनन्ये एकस्मिन्नेव । अतो भक्तेराधिक्यम् ॥ २४ ॥

भाषा—पराभक्ति श्रद्धा नहीं कहला सक्ती क्योंकि श्रद्धा साधारण है । श्रद्धा गुरु देवादिकोंमें विश्वास होनेको कहते हैं सो श्रद्धा साधारणरूप बहुतोंमें होसक्ती है, परंतु पराभक्ति जिसमें होगी एकहीमें होगी अर्थात् जिसमें पराभक्ति होगी उसके समान कोई दूसरा प्रतीत होगा ही नहीं इससे श्रद्धासे पराभक्तिका पद विशेष ऊँचा है ॥ २४ ॥

तस्यां तत्त्वे चानवस्थानात् ॥ २५ ॥

सं०टी०—तस्यां भक्तौ तत्त्वे श्रद्धात्वे सति च अनवस्थानम् तस्मात् । अनवस्थानम् अनवस्था 'यत्र तर्के उप-

पाद्योपपादकयोर्विश्रांतिर्नास्ति तादृशतर्कस्य अनवस्थादोषः तेन स तर्को न ग्राह्यः।' श्रद्धा देवगुर्वादावनेकस्था पराभक्तिस्तु एकस्मिन्नेव तस्मात् श्रद्धातो भक्तिरन्या "श्रद्धाभक्तिसमन्वितः " इत्यादिवाक्येषु शास्त्रेऽपि प्रत्यक्षतया भेदो दृश्यते ॥ २५ ॥

भाषा–भक्ति और श्रद्धाको एक समझनेमें दोष होता है इससे भक्तिका पद श्रद्धासे उत्कृष्ट है । भक्ति और श्रद्धा भिन्नभिन्नार्थद्योतक है । क्योंकि श्रद्धा गुरुदेवादि अनेकोंमें न्यूनाधिकरूपसे हो सक्ती है। परंतु पराभक्ति सिवाय एकके नहीं हो सकती। और जबतक अनेक जगह भक्ति है तबतक वह पराभक्ति कहलाही नहीं सकती। इसीसे इनको एकार्थमें लेनेसे अनवस्थादोष होता है अनवस्था उसे कहते हैं जहां उपपाद्य और उपपादकमें ठीक समानाधिकरण नहीं हो । देखिये इसीसे हमारे शास्त्रोंमें भक्ति और श्रद्धाको दो लिखा है। जैसे बहुत जगह आताहै कि श्रद्धा और भक्तिसे अमुक कार्य करे ॥ २५ ॥

ब्रह्मकांडं तु भक्तौ तस्यानुज्ञानाय सामान्यात्॥२६॥

सं०टी०–ब्रह्मकांडं तु भक्तौ एव तस्य अनुज्ञानाय सामान्यं तस्मात् ब्रह्मकांडं ब्रह्मविषयकं कांडं भक्तौ भक्त्यर्थं

तद्वज्ज्ञानस्य सामान्यत्वं दृश्यते । ज्ञानायेति षष्ठ्यर्थे चतुर्थी ॥ २६ ॥

भाषा—वेदका परभाग ब्रह्मकाण्ड भक्तिहीके लिये है और ज्ञानकांडका वर्णन उससे पहले सामान्य रूपसे है । यदि च ज्ञानकी उत्कृष्टता होती तौ वेदश्रुतियोंमें ज्ञानकांडके अगाडी भक्तिका वर्णन न होता अर्थात् ज्ञानके अगाडी फिर भक्तिकी अवस्थाका अधिकार है इसीसे भक्ति उत्कृष्ट है ॥ २६ ॥

इति प्रथमाध्यायः समाप्तः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

बुद्धिहेतुप्रवृत्तिराविशुद्धेरवघातवत् ॥ २७ ॥

सं० टी०—बुद्धिः ईश्वरप्रमितिः तद्धेतूनां श्रवणमननादीनां प्रवृत्तिः आविशुद्धेः विशुद्धिपर्यंतमेव यावद्भक्तेर्दार्ढ्यं न भवेत्तावदेव बुद्धिहेतूनां श्रवणमननादीनां प्रवृत्तिरावश्यकी अवघातवत् यावत् व्रीह्यादीनां वैतुष्यं न भवेत्तावदेव मुशलादिभ्योऽवघातः कर्तव्यः मनोमालिन्यनिरासपर्यंतं यतनीयमिति फलितोऽर्थः ॥ २७ ॥

भाषा–जबतक चित्त शुद्ध होकर पराभक्तिकी अवस्था प्राप्त नहीं होती है तबतक ही बुद्धिविषयक हेतु श्रवण मनन निदिध्यासनादिकी आवश्यकता रहती है और जब चित्त शुद्ध होकर उसमें ईश्वरसाक्षात्कारिणी शक्ति (पराभक्ति) का उदय हो जाता है तब किसी भी साधनकी आवश्यकता नहीं रहती जैसे जबतक धानपरसे तुष नहीं हट जाता तबतक ही वह कूटा जाता है और तुषरहित स्वच्छ होजाने पर कूटनेकी आवश्यकता नहीं रहती है ॥ २७ ॥

तदंगानां च ॥ २८ ॥

सं०टी०–तदंगानां यमनियमादीनामपि च मनोमालिन्यनिरासपर्यन्तमेवावश्यकत्वं भवति ॥ २८ ॥

भाषा–बुद्धिविशुद्धिके लिये अंगों यमनियमादिकी भी आवश्यकता विशेष तबतक ही रहती है कि जबतक बुद्धि व चित्त शुद्ध होकर पराभक्तिका पूर्ण विकाश होजावे और चित्त शुद्ध होकर पराभक्तिका पूर्ण विकाश हो जाता है तब किसी भी अंग यम नियमादि साधनकी आवश्यकता नहीं रहती ॥ २८ ॥

तामैश्वर्यपरां काश्यपः परत्वात् ॥ २९ ॥

सं०टी०–काश्यपः ता बुद्धिं ऐश्वर्यपरां निश्रेयसफलां मन्यते जीवस्य ब्रह्मणः परत्वात् । ईश्वरस्य भावः ऐश्वर्यं

अणिमाद्यष्टविधविभूतिविषयकं अवतारादिविषयकं नामगु-णरूपादिकं च परां तद्विषयिणीं काश्यपः द्वैतमतप्रकाशक आद्याचार्यः परत्वात् भिन्नत्वात् ॥ २९ ॥

भाषा—द्वैतमतके प्रवर्तक महर्षि काश्यप बुद्धिका ईश्वरके भावोंमें तत्पर होजाना ही पराभक्ति है ऐसा मानतेहैं अर्थात् ईश्वरके नाम-रूपगुणादि जैसे कि अवतारादिमें प्रतीत होते हैं उनमें पूज्यपूजक किंवा सेव्यसेवकभावसे बुद्धिका तत्पर होजाना ही पराभक्ति है महर्षि काश्यपजी द्वैतमतके प्रवर्तक हैं इसलिये ये ईश्वर तथा उसके प्राकृतिक ऐश्वर्य नाम रूप गुणादिको सदा सेव्य और भक्तको सदैव तत्पर अनन्यसेवक होना ही मुख्य मानते हैं ॥२९॥

आत्मैकपरां बादरायणः ॥ ३० ॥

सं०टी०—बादरायणः तां आत्मैकपरां मन्यते । बाद-रायणो व्यासः तां बुद्धिं आत्मैकपरां शुद्धात्मविषयिणीं बादरायणो अद्वैतमतप्रकाशकः वेदांतसूत्रकारः तथा च आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति ॥ ३० ॥

भाषा—महर्षि बादरायण व्यासजी बुद्धिका आत्मपर होना अर्थात् आत्माका ज्ञान होकर साक्षात्कार होजाना ही मुख्य परम

पुरुषार्थ है यही पराभक्ति है ऐसा मानते हैं इनके अद्वैत मतमें जीवका द्वैतरूपी भ्रम दूर होके सत् चित् आनंद रूप आत्मज्ञान ही मुख्य है जैसे कि इन्होंने वेदांतसूत्रोंमें प्रतिपादन किया है जैसा कि उपनिषदोंमें कहाहै कि आत्मा द्रष्टव्य है श्रोतव्य है मंतव्य है और निदिध्यासितव्य है ॥ ३० ॥

उभयपरां शांडिल्यः शब्दोपपत्तिभ्याम् ॥ ३१ ॥

सं०टी०—शांडिल्यः उभयपरां मन्यते शब्दोपपत्तिभ्याम् । महर्षिशांडिल्यः सूत्रकारः तां उभयपरां ऐश्वर्यपरां आत्मैकपरां च मन्यते । शब्दो वेदः आप्तोक्तिश्च उपपत्तिस्तर्कसिद्धिः । यथा मायोपहितजीवस्य त्वैश्वर्यपराभक्तिः कर्तुं योग्या मायावरणराहित्यावच्छिन्नस्य जीवस्यात्मारामावस्थायामात्मपरेति फलितोऽर्थः । अनेन विशिष्टाद्वैतपरता सूचिता । वस्तुतस्तु भक्तेरुभयपरत्वमेव श्रुतिस्मृतिपुराणादिषु सर्वत्र प्रतिपादितं तथाच श्रुतिः “ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिः प्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ” तथा च गीतायां “ममैवांशो जीवलोके जीवभूतः सनातनः । ” इति ॥ ३१ ॥

भाषा-सूत्रकारमहर्षिशांडिल्य दोनों प्रकारसे भक्ति मानतेहैं ऐश्वर्यपरा भी और आत्मैकपरा भी । ये कहते हैं कि शब्द अर्थात् वेद और यथार्थवादी महात्माओंके वचनोंसे तथा तर्कसिद्धसे दोनोंही प्रकारकी भक्ति सिद्ध होतीहै जैसे मायाके आवरणसे आच्छादित जीवोंको ऐश्वर्यपरा नामगुणरूपादिसंपन्न जगन्नियंता ईश्वरमें परा भक्ति करनी योग्य है और जिनका मायाका आवरण दूर होगया सब प्रकार रागादिकी निवृत्ति होगई हो उस आत्मारामावस्थामें आत्मपरा भक्ति अर्थात्-आत्मज्ञान आत्माचिंतनरूप परा भक्ति कर्तव्य है इन दोनोंहीको माननेसे महर्षि शांडिल्यजीकी विशिष्टाद्वैतपरता सूचित होतीहै । और यही ठीकभी है कि श्रुति स्मृति पुराण आदि सभीमें दोनों प्रकारकी ही भक्ति प्रतिपादन करी है, जैसे श्रुतिमें कहाहै कि जो ईश्वरसृष्टिकी आदिमें ब्रह्माको धारण करताहै और उसको वेदोंका ज्ञान देताहै उस आत्मबुद्धिप्रकाशक देव परमात्माकी शरण मुमुक्षु होवे तथा श्रीगीतामें ऐसा उपदेशभी भगवान्ने किया है कि मेराही सनातन अंश प्राणियोंके हृदयमें जीवरूप होकर रहता है इन दोनों बातोंसे दोनों ही प्रकारकी भक्ति अवस्थाभेदसे ठीक है ॥ ३१ ॥

वैषम्यादसिद्धमिति चेन्नाभिज्ञानवदवैशिष्ट्यात् ३२॥

सं०टी०-वैषम्यात् उभयपक्षप्रतिपादनात् एतद्विषयं असिद्धं इति चेत् न अभिज्ञानवत् अवैशिष्ट्यात् । भक्तेरैश्वर्यपरत्वं आत्मैकपरत्वं चोभयपक्षरूपवैषम्यात् एतद-

सिद्धं न भवितुमर्हति कुतः अभिज्ञानवैशिष्ट्यात् । अभिज्ञा-नवैशिष्ट्येनैव वैषम्यप्रतीतिः न तु वस्तुतः । तथा चोक्तं भगवता कृष्णेन गीतायां दशमेऽध्याये " अहमात्मा गुडा-केश सर्वभूताशयस्थितः । " इत्यात्मविषयः । तत्रैव तथा चोक्तं " अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते । इति मत्वा भजंते मां बुधा भावसमन्विताः ॥" इत्यैश्वर्यविषयः फलतः सर्वशक्तिसंपन्ने परमात्मनि न तु वैषम्यभावः ॥ ३२ ॥

भाषा—वैषम्य (उयभपक्षप्रतिपादन) अर्थात् भक्तिको ऐश्वर्यप-रत्व और आत्मैकपरत्व दोनों पक्ष प्रातिपादन होनेसे ईश्वरके ऐश्वर्यमें अथच आत्मत्वमेंसे किसी एकमें असिद्धि प्रतीत है ऐसा नहीं है क्योंकि जैसे अविशेष अभिज्ञान जिसमें विषमता दीखने पर भी असिद्धता या विरोध वास्तवमें नहीं होते जैसे कि कोई आम्रको अम्ल कहे और कोई मधुर तो इसमें अम्लता और मधुरतामेंसे किसीमें असिद्धि नहीं है और न विरोध है क्योंकि वही आम्र अपक्क दशामें अम्ल है और परिपक्क दशामें मधुर है ऐसे ही ईश्वर ऐश्वर्यवान् भी है और आत्मरूप भी है जैसा कि भगवान्ने गीताके दशवें अध्यायमें स्वयं श्रीमुखसे कहा है कि हे अर्जुन ! मैंही सब प्राणियोंके हृदयमें आत्मरूपसे स्थित रहता हूं यह तो आत्मपर विषय हुआ और फिर वहां ही कहा है कि

सब संसारका उत्पन्न करनेवाला हूं मुझसे ही सब संसारकी प्रवृत्ति होती है मुझको ऐसा समझकर भावसहित जो मेरा भजन भक्ति करते हैं वेही ज्ञाता विद्वान् हैं यह ऐश्वर्यपर विषय हुआ अस्तु । जीवावस्थामें मायोपहित अल्पज्ञ आत्मा ईश्वरांश है और कर्तावस्थामें सर्वैश्वर्यसंपन्न पूर्ण सर्वज्ञ ईश्वर है इससे ईश्वरमें कोई वैषम्य दोष नहीं है ॥ ३२ ॥

न च क्लिष्टः परः स्यादनंतरं विशेषात् ॥ ३३ ॥

सं० टी०—परश्च क्लिष्टः न स्यात् अनंतरं विशेषात् । परः परमात्मा क्लिष्टः क्लेशयुक्तः न स्यात् कुतः अनंतरं विशेषात् आत्मावस्थायां अविद्यासंपन्नजीवत्वोपाधिसुखदुःखादिक्लेशयुक्तः ईश्वरावस्थायां च कर्तृत्वगुणविशिष्टादिनानोपाधिरूपक्लेशयुक्तः स्यात्तन्न अनंतरं विशेषात् । अनंतरं बुद्ध्यनंतर क्लेशादेरात्मसंबंधिरूपविशेषदर्शनात् । वस्तुतस्तु आत्मा न च क्लेशादितो लिप्तः स्यात् तदुक्तं गीतायाम् "अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः । शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥" तथा चोक्तं "रागेच्छासुखदुःखादि बुद्धौ सत्यां न चात्मनि । सुषुप्तौ नास्ति तन्नाशे तस्माद्बुद्धेर्न चात्मनः ॥" अतो नैवात्मा सुखदुःखा-

रचना पालन संहारादि ऐश्वर्यों में भी क्लेश नहीं होता क्योंकि ईश्वर सदा स्वतंत्र है और ये उसके स्वाभाविक भाव हैं और स्वाभाविकसे क्लेश नहीं होता जैसे अग्निमें तीक्ष्ण गरमाई और सर्पके मुखमें विष स्वाभाविक ही होते हैं, जिससे उन्हें कुछभी क्लेश नहीं होता । हां जो अस्वाभाविक आगंतुक ऐश्वर्यादिक भाव होते हैं वे सभी सुखदुःखरूप उपाधि और क्लेशरूप होतेही हैं इसमें संदेह नहीं परंतु परमेश्वरमें कर्तृत्वादि भाव उत्पत्ति पालन संहारादि ऐश्वर्य सभी स्वतंत्र और स्वाभाविक होनेसे क्लेशरूप नहीं होते ॥ ३४ ॥

अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम्॥३५॥

सं०टी०—परैश्वर्यं परमेश्वरस्यैश्वर्यं अप्रतिषिद्धं अखंडरूपकं तद्भावात् च इतरेषां जीवानां नैवम् । परस्य परमेश्वरस्य ऐश्वर्यं परैश्वर्यं न कदाचिदपि निषिद्धं अखण्डरूपकमित्यर्थः । कुतः तद्भावात् ईश्वरीयभावात् पूर्णशक्तिमत्तया च इतरेषां जीवानामैश्वर्यं च अल्पशक्तिमत्तया नैवं किंतु प्रतिषिद्धरूपकं क्षणिकमेव ॥ ३५ ॥

भाषा—परमेश्वरका ऐश्वर्य कभी भी प्रतिषिद्ध अर्थात् निषेधरूप नष्ट नहीं होता, सदा अखंड बनाही रहता है । क्योंकि ईश्वरका ऐश्वर्य ईश्वरीय स्वभावरूप है और परमेश्वर सदा पूर्णशक्ति-

संपन्न है इससे उसका ऐश्वर्य कभी क्षय नहीं होता । हां इतर जीवोंका ऐश्वर्य ऐसा अखंड नहीं होसक्ता क्योंके जीव अल्पशक्तिमान् है इससे इसका ऐश्वर्यभी प्रतिषिद्धरूप क्षणिक है ॥३५॥

सर्वानृते किमिति चेन्नैवं बुद्ध्यानंत्यात् ॥ ३६ ॥

सं०टी०—सर्वानृते सर्वप्रतिषेधे किमिति ऐश्वर्यं किमिति चेत् तन्न बुद्ध्यानंत्यात् । सर्वप्रतिषेधे सर्वानंगीकरणे मुक्तावेव यततव्यमिति मन्यमाने ऐश्वर्येण किमिति चेत् तन्न कुतः बुद्धेरानंत्यात् सत्वरजस्तमसां न्यौनाधिक्येन बुद्धेरानंत्यभावात् रजःप्रधानबुद्धिमद्भक्तानां तु ऐश्वर्यानंतरं मुक्तिस्पृहा स्यादित्यादि । अत्रैश्वर्यपदं पूर्वसूत्रादनुवर्तनीयम् ॥ ३६ ॥

भाषा—सबको प्रतिषेध कर अनंगीकार करने और केवल मुक्तिहीका यत्न करना ऐसाही मानलेवे तौ क्या अर्थात् ऐश्वर्यसे प्रयोजन ही क्या इसपर सूत्रकार कह रहे हैं कि ऐसा नहीं है, क्योंकि जीवोंकी बुद्धियोंमें अनंतता है, सभी जीवोंकी बुद्धि अनंत प्रकारकी होती है अर्थात् अनंत कामनावाली जीवोंकी बुद्धि होती है सत्वरजतमकी न्यूनता अधिकता आदिसे जीवोंकी बुद्धि और लालसाओंमें बडा अंतर है और रजोगुणप्रधान

बुद्धिवाले भक्तोंको तौ ऐश्वर्यके अनंतर ही मुक्तिकी अभिलाषा हो सकती है ॥ ३६ ॥

प्रकृत्यंतरालादवैकार्यं चित्सत्त्वेनानुवर्तमानात् ३७॥

सं०टी०—ननु कर्तृत्वाद्यैश्वर्यवत्त्वे परमात्मा विकारवान् भवति तत्राह चित् अवैकार्यं कुतः प्रकृत्यंतरालात् । प्रकृतेः पार्थक्यभावात् सत्त्वेन अनुवर्तमानात् चित् चैतन्यरूपं ब्रह्म प्रकृतिः जडकार्यमात्रोपादानम् । संसारस्योपादानकारणमित्यर्थः । अंतरालं अभ्यंतरार्थे इति शब्दस्तोमः । न अंतरालं अनंतरालं पार्थक्यमिति भावः । सत्त्वं सांख्यसिद्धे प्रकाशादिसाधने प्रकृत्यवयवे न्यायोक्ते सत्तारूपे च इति शब्दस्तोमः । सृष्ट्यादौ प्रकृतिरेव विकार्या न तु स्फुरणरूपचैतन्यसत्तया प्रकृत्यनुगतत्वेन च परस्य कर्तृत्वादि न च प्रकृतिरेव सत्तेति वक्तुं शक्यते किंच मायाशक्तिमंतरालीकृत्य परस्य कर्तृत्वादिस्वाभाव्यं भवति न तु विकार्यता नैव क्षीरादिवत् न कनककुंडलादिवच्च स्वरूपपरिवर्तनेन विकारित्वम् । किंतु घटं प्रति निमित्तकारणवत्त्वेन कुलालवत् परस्य कर्तृत्वमुपपद्यते तच्चास्तु ॥ ३७ ॥

भाषा–शंका होतीहै कि कर्तापन इत्यादि ऐश्वर्ययुक्त परमात्मा हो तौ वह विकारवान् होगा इसपर सूत्रकार कहतेहैं कि चित् अर्थात् चैतन्य ब्रह्म परमात्मा विकारवान् नहीं है क्योंकि वह प्रकृतिसे पृथक् है कभी लिप्त नहीं होता और सत्त्व अर्थात् प्रकाशादि साधनरूप प्रकृतिके अवयवोंके अनुगत चैतन्य सत्तासे वर्तमान रहताहै । प्रयोजन यह कि सृष्टिके समय प्रकृतिहीमें विकार होताहै और चैतन्यरूप परब्रह्म परिस्फुरणरूप हो प्रकृतिमें प्रकाशमात्र होनेसे उसको कर्तृत्वादि विकारवान् नहीं कहसक्ते और प्रकृति जडमात्र समस्त संसारका उपादान कारण हो चैतन्य ब्रह्म की सत्तामात्रसे विकारवती होतीहै प्रकृतिको सत्तारूप नहीं कहसक्ते । हां प्रकृतिमें प्रेरक चैतन्यरूप परब्रह्मका आभास होनेसे जो कर्तृत्वादि प्रतीत होताहै वह उसका स्वाभाविक है विकाररूप नहीं है जैसे रूप परिवर्तन होकर दुग्धका दधि तक्रादि और सुवर्ण कंकण कुंडलादि होजाताहै ऐसे परमात्मा विकृत नहीं होता किंतु जैसे घटके प्रति कुंभकार निमित्त कारणरूप कर्ता होताहै वैसेही परमेश्वरमें भी सृष्टिके प्रति निमित्त कारणरूप कर्तृत्वभाव होसक्ताहै सो रहो ॥ ३७ ॥

तत्प्रतिष्ठा गृहपीठवत् ॥ ३८ ॥

सं॰टी॰–ननु परब्रह्मणि विकाररराहित्ये विकारादीनां क प्रतिष्ठा तथा च तस्मिन् सर्वं प्रतिष्ठितं इत्यादि श्रुतिवाक्यविरोधस्तत्राह तत्प्रतिष्ठेति । तत्प्रतिष्ठा तेषां विकारादीनां

संसृतिव्यापारादीनां प्रतिष्ठा गृहपीठवज्ज्ञेया । एवं तस्मिन् ब्रह्मणि विकारप्रतिष्ठानमविरुद्धम् । यथा गृहमध्यगतपीठोपरि स्थितोऽपि गृहे तिष्ठतीतिवत् विकारादयः प्रकृतिस्थाः प्रकृतिश्चेश्वरीयसत्ताश्रयेण जगद्रचनादिकं करोति अतो रचनादिविकारा प्रकृतिश्च चित्सत्ताश्रयीभूता एव यथा मृत्सत्वेऽपि घटादीनां संसृतौ मृत्साहित्येन घटादीनां करणरूपव्यापारादयश्च सर्वे कुंभकाराश्रयीभूता एव ॥ ३८ ॥

भाषा—शंका होती है कि परमात्मा विकाररहित है तो फिर विकारादिकोंकी प्रतिष्ठा कहां है अर्थात् विकारादि कहां रहतेहैं और श्रुतियोंमें ऐसा कहाहै कि उस ब्रह्महीमें सब कुछ प्रतिष्ठित है इस वाक्यमें विरोध आवेगा इसपर महर्षि कहते हैं कि तत्प्रतिष्ठा अर्थात् उन विकारादि संसारके व्यापारोंकी प्रतिष्ठा घर और पीढीकी भांति जानो इस तरह उस ब्रह्ममें विकारोंका मानना विरुद्ध भी नहीं होगा जैसे घरमें रक्खी हुई पीढी (चौकी) पर बैठा हुआ मनुष्य घरमें ही होताहै घरसे बाहर नहीं अर्थात् पीढी पर बैठा हुआ मनुष्य और पीढी दोनोंही घरमें हैं। प्रयोजन यह कि विकार प्रकृतिमें हैं और प्रकृति ईश्वरीय सत्ताके आश्रयसे जगत्की रचना आदि करती है इससे जगत्की रचनादि विकार और उपादान रूप प्रकृति दोनोंही चित्सत्ताके आश्रय हैं जैसे घट

दिकी रचनाके समय मिट्टी होनेपर भी मिट्टीसहित घटादि रचनाके सभी व्यापार कुंभकारके ही आश्रय होतेहैं और कुंभकार स्वतंत्रतासे जैसे जैसे चाहे घटादिकी रचना करताहै अर्थात् कुंभकार घटादिका कर्ता होकर भी विकृत नहीं होता और घटादिसे पृथक् रहताहै ॥ ३८ ॥

मिथोऽपेक्षणादुभयम् ॥ ३९ ॥

सं०टी०—मिथः अपेक्षणात् अन्योन्यापेक्षणात् 'सृष्ट्यादौ परस्पराकांक्षाभावात्' उभयमेव कारणम् । ब्रह्म प्रकृतिश्च चैतन्यत्वेन जडत्वेन च परस्परोपकरणात् उभयमेव संसारस्य कारणं स्यात् । मिथः अन्योन्यार्थेऽव्ययम् ॥ ३९ ॥

भाषा—एकको दूसरेकी आकांक्षा होनेसे जगत्के कारण पुरुष और प्रकृति दोनों ही हैं क्योंकि प्रकृति जडरूप सबका उपादान कारण है और ब्रह्म चैतन्यरूप होकर नियंता और निमित्तकारण है अर्थात् दोनोंही की परस्पर उपकारतासे ही संसार उत्पन्न होता है । किसीसे भी एकके विना संसार होही नहीं सक्ता जैसे समस्त वस्तुओंकी रचनामें मुख्य दोहीकी आवश्यकता होती है । एक सामग्री अर्थात् मसाला जिससे वह वस्तु बनाई जावे दूसरा बनानेवाला इसी प्रकार इस जगत्कीभी जडरूप संपूर्ण सामग्री प्रकृति है बनानेवाला चैतन्यरूप परमेश्वर नियंता है ॥ ३९ ॥

चेत्याचितोर्न तृतीयम् ॥ ४० ॥

सं०टी०—चेत्या प्रकृतिः चिद् ब्रह्म तयोर्भिन्नं न तृतीयम् । अस्यायमर्थः प्रकृतिभिन्ने किंचिदपि ज्ञेयत्वं न स्यात् ब्रह्मभिन्ने ज्ञातृत्वमपि न । सर्वज्ञातृत्वं ब्रह्मण्येव ज्ञेयत्वं प्रकृतौ च तृतीयत्वादीनि सर्वाणि विकृतिमात्राणि चोभयोः संबंधादेव प्रकृतिपुरुषयोरसंबंधे च सर्वकार्यविलोपः स्यात् ॥ ४० ॥

भाषा—चेत्या प्रकृति और चित् ब्रह्म इनसे भिन्न तीसरा कोई नहीं है इसका प्रयोजन यह है कि प्रकृतिसे पृथक् कोई भी ज्ञेय पदार्थ नहीं है और ब्रह्मसे भिन्न कोई भी ज्ञाता नहीं अर्थात् सर्वत्र ही ज्ञातारूप ब्रह्म है और ज्ञेयरूप प्रकृति है इससे संसारके येही दो कारण हैं तथा तृतीयादिक सब जगत्के पदार्थ विकारमात्र हैं और इन्हींके संयोग संबंधसे होते हैं और प्रकृति पुरुषका संयोग संबंध नहीं हो तौ कुछभी नहीं होता ॥ ४० ॥

युक्तौ च सम्परायात् ॥ ४१ ॥

सं०टी०—युक्तौ प्रकृतिपुरुषयोः संयोगे च संपरायः स्यात् तस्मात् । तौ प्रकृतिपुरुषौ परस्परं प्रतिसंबंधरूपौ स्तः

